# U.G. 5th Semester Examination - 2020

## SANSKRIT

### Course Code: BSNSCCHT502

### Course Title: Sanskrit Grammar

Full Marks : 40 Time : 2 Hours

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

1. अधोलिखितेषु **दश**प्रश्नाः देवभाषया देवनागरीलिप्या च समाधेयाः : 1×10=10

   i) 'लिंगपरिमाणवचनमात्रे'—का विभक्तिर्भवति?

   ii) गौणकर्मणः उदाहरणमेकं दीयताम्।

   iii) 'सह युक्तेऽप्रधाने'—इत्यत्र कस्तावत् प्रधानः? तत्र का विभक्तिर्भवति?

   iv) अनीप्सितं कर्म कतिविधम्?

   v) 'नमः' शब्दयोगे का विभक्तिः प्रयुज्यते?

   vi) कर्मसंज्ञाविधायकं सूत्रमेकं लिख्यताम्।

   vii) 'उत्पातेन ज्ञापिते च'—तत्र को नाम उत्पातः?

   viii) कतिविधाः नञर्थाः?

   ix) का नाम वृत्तिः? कतिविधा च सा?

   x) सामीप्यार्थे अव्ययीभावस्य उदाहरणमेकं लिख्यताम्।

   xi) 'समर्थः पदविधिः'—तत्र सामर्थ्यं कतिविधम्?

   xii) का नाम विभक्तिः?

[Turn Over]

   xiii) अव्ययीभावसमासस्य वैशिष्ट्यमेकम् उल्लिख्यताम्।

   xiv) 'चार्थे द्वन्द्वः'—चार्थः कतिविधः?

   xv) व्यतिहारबहुव्रीहेरुदाहरणमेकं लिख्यताम्।

2. अधोलिखितेषु **पञ्च** प्रश्नाः देवभाषया देवनागरीलिप्या च समाधेयाः : 2×5=10

   i) '<u>धनात्</u> विद्या गरीयसी'—रेखांकितस्य पदस्य ससूत्रं विभक्तिर्निर्णेया

   ii) '<u>दुग्धात्</u> दधि जायते'—रेखांकितपदस्य ससूत्रं कारकविभक्तिनिर्देशः क्रियताम्।

   iii) 'वपुषा चतुर्भुजः'—इत्यत्र कथं तृतीया विभक्तिः? सूत्रमुल्लिख्यताम्।

   iv) का नाम उपपदविभक्तिः? उदाहरणं दीयताम्।

   v) 'हेतु' शब्दस्य प्रयोगे का विभक्तिर्भवति? उदाहरणं दीयताम्।

   vi) 'उपगिरम्'—इति पदस्य विग्रहवाक्यमुल्लिख्य समासो निर्णेयः।

   vii) आधारः कतिविधः? के च ते?

   viii) उपसर्जनसंज्ञाविधायकं सूत्रद्वयं किम्?

3. सूत्र**द्वयं** देवभाषया व्याख्यायताम् : 5×2=10

   i) साधकतमं करणम्।

   ii) आख्यातोपयोगे

   iii) अपवर्गे च

4. कस्याप्**येकस्यो**त्तरं सविशदं प्रदेयम् : 10×1=10

   i) ससूत्रं भेदोपभेदसहितं च द्वन्द्वसमासो वर्ण्यताम्।

   ii) कर्मधारयसमासविषयकमालोचनं वैशद्येन क्रियताम्।

   iii) पञ्चसमासान्तप्रत्ययाः ससूत्रं सोदाहरणञ्च आलोच्यन्ताम्।

———